## दिवः कर्म च। (४३/५६२)

पूर्वेण करणसञ्ज्ञायां प्राप्तायां कर्मसञ्ज्ञा विधीयते। दिवः साधकतमं यत् कारकं [1]तत् कर्मसञ्ज्ञं भवति, चकारात् करणसञ्ज्ञं च। अक्षान् दीव्यति, अक्षैर्दीव्यति॥

## परिक्रयणे सम्प्रदानमन्यतरस्याम्। (४४/५८०)

साधकतमम् इति वर्तते। [2]पूर्वेण करणसञ्ज्ञायां [3]प्राप्तायां सम्प्रदानसञ्ज्ञा [4]पक्षे विधीयते। परिक्रयणे [5]साधकतमं कारकम[6]न्यतरस्यां सम्प्रदानसञ्ज्ञं भवति। परिक्रयणं नियतकालं वेतनादिना स्वीकरणम्, नात्यन्तिकः क्रय [7]एव। शतेन परिक्रीतोऽनुब्रूहि, शताय परिक्रीतोऽनुब्रूहि। सहस्रेण परिक्रीतोऽनुब्रूहि, सहस्राय परिक्रीतोऽनुब्रूहि॥

## आधारोऽधिकरणम्। (४५/६३२)

[8]आध्रियन्तेऽस्मिन् क्रियाः इत्याधारः। कर्तृकर्मणोः क्रियाश्रयभूतयोः[9]धारणक्रियां प्रति य आधारः, तत् कारकमधिकरणसञ्ज्ञं भवति। कटे आस्ते। [10]कटे शेते। स्थाल्यां[11] पचति। अधिकरणप्रदेशाः—'सप्तम्यधिकरणे च' (२.३.३६/६३३) इत्येवमादयः॥

## अधिशीङ्स्थासां कर्म। (४६/५४२)

पूर्वेणाधिकरणसञ्ज्ञायां प्राप्तायां कर्मसञ्ज्ञा [12]विधीयते। अधिपूर्वाणां शीङ् स्था आस् इत्येतेषामाधारो यः, तत् कारकं कर्मसञ्ज्ञं भवति। ग्राममधिशेते। ग्राममधितिष्ठति। [13]पर्वतमध्यास्ते॥

## अभिनिविशश्च। (४७/५४३)

अभिनि[14]पूर्वस्य विशतेराधारो यः, तत् कारकं कर्मसञ्ज्ञं भवति। ग्राममभिनिविशते[15]। कथं कल्याणेऽभिनिवेशः, [16]पापेऽभिनिवेशः, या या [17]सञ्ज्ञा यस्मिन् यस्मिन् [18]सञ्ज्ञिन्य[19]भिनिविशते इति[20]? अन्यतरस्याम् [21]इति वर्तते, 'परिक्रयणे सम्प्रदानमन्यतरस्याम्' (१.४.४४/५८०) इत्यतः। सा च व्यवस्थितविभाषा विज्ञायते॥

---

1. तत्कारकं ड. 2. पूर्वेण नास्ति फ. 3. प्राप्तायां नास्ति ह. 4. अनेन ह, नास्ति फ. 5. यत् इत्यधिकम् अ. फ. ह. 6. तत् इत्यधिकम् अ. फ. ह. 7. एव नास्ति फ. 8. आध्रियतेऽस्मिन् क्रिया क. फ, क्रिया नास्ति ह. 9. धारणाम् ड. फ. 10. शकटे ड. फ. ह. 11. ओदनं इत्यधिकम् अ. 12. अनेन इत्यधिकम् फ. 13. ग्राममध्यास्ते फ. 14. इत्येवं इत्यधिकम् ह. 15. पर्वतमभिनिविशते इत्यधिकम् फ. 16. पापेऽभिनिवेशः नास्ति फ. 17. क्रिया ह. 18. संज्ञिनि नास्ति अ.ब.फ.ह. 19. अभिनिविशति क. 20. च इत्यधिकम् ह. 21. [0]ग्रहणमिहानुवर्तते फ. ह.